International Journal of Sanskrit Research 2023; 9(2): 300-303

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 300-303
© 2023 IJSR
www.anantaajournal.com
Received: 23-01-2023
Accepted: 26-02-2023

**सुप्रीति साहा**
सहकारी अध्यापिका, शैलजानन्द फाल्गुनी स्मृति महाविद्यालय, वीरभूम, पश्चिम बंगाल, भारत

**Corresponding Author:**
**सुप्रीति साहा**
सहकारी अध्यापिका, शैलजानन्द फाल्गुनी स्मृति महाविद्यालय, वीरभूम, पश्चिम बंगाल, भारत

# कविराजशेखरविरचिता 'विद्धशालभञ्जिका' नाटिकायां काव्यसौंदर्यविचारः

## सुप्रीति साहा

**सारांश**
संस्कृतसाहित्ये काव्यनाटकजगतञ्च अधिकृत्या यत् काव्यिकहृदयस्य उद्भवमभवत्, तेषां दशमशतकस्य कविः राजशेखरः विशेषतः स्मरणीयः। काव्यशास्त्रे कविशिक्षाविषयकः काव्यमीमांसा एवं रूपकचतुष्टयस्य प्रणेता कविः राजशेखरः महाराष्ट्रस्य यायावरवंशोद्भूतमासीत्। आशैशवात् स विद्यावातावरणस्यान्तर्भूक्त्वा पालितमभवत्। राजा महेन्द्रपालस्य उपदेशात् स 'वालरामायणम्' इति नाटकस्य रचनामकरोत्। अनन्तरं 'विद्धशालभञ्जिका' नाटिका रचनाकाले स लाटाधिपतेः अधीने विद्यमानमासीत्। काल्पनिकभावधारया विरचितम् अस्यां नाटिकायां नवनायिकया सह विवाह हेतु नायकस्य राजचक्रवर्तीत्वप्राप्तेरेकम् अभिनवं काहिनीं वर्णितं भवति। तस्य काव्यिकगुणस्य मध्ये प्रेममयहृदयस्य सन्धानं प्राप्नोति चतुरंकविशिष्टं विद्धशालभञ्जिकानाटिकायाम्। कलचूरीराज्यस्य महामहीपः विद्याधरमल्लेन लाटाधिपती चन्द्रवर्मा इति सामन्तराजः पुत्री मृगाङ्कवल्याः विवाहं वर्णितमस्ति। इयं सुललितं प्रेमस्पर्शीकाहिनीं सार्थकतां प्रदानं हेतु नाटिकायां विविधः रसः-अलंकारः-छन्दः प्रभृत्याः यथायुक्तं प्रयोगं अकरोत् तथा प्रकृतिजातानां विविधानां वस्तूनां मध्ये प्राणान् सञ्चारणं कृत्वा नाटिकायाः सौंदर्यं वर्धित्वा काव्यिकसौन्दर्यं प्रदायति। अस्मिन् नाटिकायां प्रेमस्य स्वरूपं यथा चन्द्रमायाः वर्णनं, नायिकायाः सौंदर्यवर्णनं, सर्वत्रं सरलभाषाप्रयोगं, माधुर्यादि गुणप्रयोगम्, उपमारूपकादि अलंकारप्रयोगं तथा शृंगारवीरादि रसप्रयोगमादि परिलक्ष्यते। कविः रससिक्तं पदं योजयित्वा नाटिकात्यन्तं रसपूर्णमकरोत्। नाटिकायाः कथावस्तुः यद्यपि साधारणं किन्तु कविः तत् कथावस्तुं नितान्तं कलात्मकरूपेण परिपूर्णयति। वारम्वारं वयं तस्य शव्दमूर्च्छनां पठित्वा मुग्धतामनुभवन्ति।

**कूटशब्दः** कविराजशेखरः, विद्धशालभञ्जिका, अलंकारः, गुणः, छन्दः, प्रकृतिः

**प्रस्तावना**
काव्यतत्वसमीक्षायाः उद्भवस्य पूर्वे विपुलं काव्यरत्नस्य प्रकाशं वैदिकलौकिकश्चसाहित्ये अभवत्। ऋग्वेदे किञ्चित सूक्ते विशेषभावस्य प्रकाशं दृश्यते। यत् रम्यभाषायाः परिधानेन उपस्थापितं भवति। ऊषासूक्तं तथा लौकिकसूक्ते अति परिमाणं काव्यस्याभिव्याक्तिं प्राप्नोति। अथर्ववेदे अप्सरा-राष्ट्रश्चसूक्ते अस्य उदाहरणं विद्यते। वेदसमूहानि परमेश्वरस्य रूपानि यत् न नष्टं भवति, कदापि पुरातनमपि न भवति-'पश्

देवस्य काव्यं न ममार न जीर्यति।'[1] लौकिकसाहित्ये काव्यसाहित्यस्य इयं ज्योतिरूपं स्रोतं रामायणमहाभारतेन च प्रवाहितमभवत्। पूर्वकालीनः अस्य कालजयीसाहित्यम् आधारिभूत्वा उत्तरकाले कालिदास-अश्वघोष-भास-भारवी च प्रभृतीनां कवीनां प्राणस्पशर्शी लेखन्या काव्यसाहित्यमधिकं वर्धयन्ति। अपितु इयं काव्यसाहित्यान् नीत्वा अनन्तरं काव्यतात्विकाः एकाधिकं समीक्षायां स्वां निविष्टिं कूर्वन्ति।

संस्कृतसाहित्ये काव्यनाटकजगतञ्च अधिकृत्वा यत् काव्यिकहृदयस्य उद्भवम् अभवत्, तेषां दशमशतकस्य कविः राजशेखरः विशेषतः स्मरणीयः।

काव्यशास्त्रे कविशिक्षाविषयकः काव्यमीमांसा एवं रूपकचतुष्टयस्य प्रणेता कविः राजशेखरःमहाराष्ट्रस्य यायावरवंशोद्भूतमासीत्। अकालजलदः तस्य प्रपितामह आसीत्। तस्य पितरौ दर्दुकः शीलवतीश्च। सः चौहानवंशजाता अवन्तीसुन्दरी नाम्ना अभिहिता एकां विदुषीकन्यां विवाहम् अकरोत्। अर्थात् आशैशवात् सविद्यावातावरणस्यान्तर्भूक्त्वा पालितमभवत्। कान्यकुव्जनरेशः महेन्द्रपालस्य (876—907 ई) सः गुरुः आसीत्। महेंद्रपालस्य उपदेशात् सः'वालरामायणम्' इति नाटकस्य रचनामकरोत्। 'विद्धशालभञ्जिका' नाटिका रचनाकाले सः लाटाधिपतेः अधीने विद्यमानमासीत्। पुनः सः महेंद्रपालस्य पुत्रः महीपालस्य सभासदरूपे प्रत्यावर्तमकरोत्। 'वालभारतम्' इति नाटकस्य रचनाऽपि तत् समये अभवत्। तद्धेतु तस्य जीवत्कालः880-930ई अस्य मध्ये स्वीकृतमिति। तस्य चतुर्विधं रूपकं यथा- वालरामायणम्, वालभारतम् अथवा प्रचण्डपाण्डवम्, विद्धशालभञ्जिका एवं कर्पूरमञ्जरी च।

काव्यमीमांसा विंशसंख्यकः अध्यायविशिष्टःकविशिक्षाविषयकः ग्रन्थः। हरविलासनामकःअपरः एकः ग्रन्थः यत् कविराजशेखरेन रचितः, तत् अद्यावधिः अनुपलब्धः। अतः सः षट् प्रवन्धस्य रचयिता आसीत्-'विद्धि नःषट् प्रबन्धान्।'[2]

साहित्यमनीषिनाम् तथा विद्वत्समाजे राजशेखरः अतीव सम्मानं प्राप्तवान्। राजदरवारेऽपि स्व महत्वेन श्रेष्ठासनमर्जितवान्।

मम वर्णितविषयं यत् कविराजशेखरेन विरचितं 'विद्धशालभञ्जिका'नाटिकायाः काव्यसौन्दर्यविचारः। काल्पनिकभावधारया विरचितम् अस्यां नाटिकायां नवनायिकया सह विवाह हेतु नायकस्य राजचक्रवर्तीत्वप्राप्तेरेकम् अभिनवं काहिनीं वर्णितं भवति। तस्य काव्यिकगुणस्य मध्ये प्रेममयहृदयस्य सन्धानं प्राप्नोति चतुरंकविशिष्टं विद्धशालभञ्जिकानाटिकायाम्।

काव्यं कदापि मनुष्यं आनन्दं ददाति, कदापि विषादमयं करोति। पुनः कदापि हास्यतरंगे उद्भासितं करोति।कविः स्वात्मभूतं वोधदयेन काव्यिकसौन्दर्यं सुशोभितं वर्धितञ्च करोति।

कवि राजशेखरः'विद्धशालभञ्जिका'नाटिकायां विविधानां भावानां प्रयोगं करोति। इयम् एकां प्रणयधर्मी नाटिका। कल्चुरीराज्यस्य महामहीपः विद्याधरमल्लेन लाटाधिपती चन्द्रवर्मा इति सामन्तराज्ञः पुत्री मृगाङ्कवल्याः विवाहं वर्णितमस्ति।इयं सुललितं प्रेमस्पर्शीकाहिनीं सार्थकतां प्रदानं हेतु कविः नाटिकायां विविधः रसः-अलंकारः-छन्दः प्रभृत्याः यथायुक्तं प्रयोगं अकरोत् तथा प्रकृतिजातानां विविधानां वस्तूनां मध्ये प्राणान् सञ्चारणं कृत्वा नाटिकायाः सौन्दर्यं वर्धित्वा काव्यिकसौन्दर्यं प्रदायति।

अस्मिन नाटिकायां प्रेमस्य स्वरूपं यथा चन्द्रमायाः वर्णनं, नायिकायाः सौंदर्यवर्णनं, सर्वत्रं सरलभाषाप्रयोगं, माधुर्यादि गुणप्रयोगम्, उपमारूपकादि अलंकारप्रयोगं तथा शृंगारवीरादि रसप्रयोगमादि परिलक्ष्यते। अस्याः नाटिकायाः इतिवृत्तं महत्वपूर्णमस्ति।

यदि कर्णकुहरे रसायनपानस्य इच्छां जागरति, अथवा यदि चित्ते विशिष्टं ज्ञानं प्राप्तस्याभिलाषां जायते, अथवा यदि हृदये रसस्रोतस्य सञ्चारं कर्तुमिच्छति, तथा यदि जीवनवृक्षस्य मधुरफलं आस्वादनाय इच्छामुत्पाद्यते तर्हि राजशेखरस्य अमृतवर्षिणीं सूक्तीं श्रोतव्यम्।एतद् कृष्णशंकर वर्मा इति कविना कथितमिति।अनेन श्लोकेन कविः राजशेखरः प्रशंसितमिति।यथा-

"पातुं श्रोत्ररसायनं रचयितुं वाचः सतां सम्मतां
व्युत्पत्तिं परमामवाप्तुमवधिं लव्धुं रसस्रोतसः।
भोक्तुं स्वादुफलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद्भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनी।।[3]

काव्यरचनायामुतकृष्टेवमनुकूलं पदस्य संयोजनं,मनोरमं वर्णस्य प्रयोगं तथा उपयुक्तं छन्दस्य प्रयोगं काव्यसौष्ठवं प्रदीयते। यत् कवेः मूलं लक्षणम्। एतदतिरिक्तं उपयुक्तं अलंकारयोजनेन काव्यशोभां वृद्धिप्राप्तं भवति। अपितु अतिरिक्तं स्वानुभूतिपूर्णं अभिव्यक्तिपटुत्वेन उक्तिवैचित्र्यमपि युक्तं भवति। यत् कवेर्जीवनस्य उल्लेखयोग्यं निष्ठारूपेन परिचितम्।यदि उक्तं तत्त्वं

विचार्यते ततः प्रतिक्षेत्रे राजशेखरस्य रचनायामुपयुक्तं सार्थकं च प्रयोगं वयं दृश्यामः।

नाटकस्य मूलरसरूपेन शृंगाररसः विद्यमानोऽस्ति। रसपरिवेशने कवेः भूमिकामनवद्योऽस्ति। नायिकाविरहेन राज्ञः हृदयस्य यत् आकुतिः तत् सः विप्रलम्भशृंगारेन स्वस्वातन्त्रं परिस्फुटयति। शृंगाररसस्य एकं सुन्दरमुदाहरणं यथा—बाणान् संहर मुञ्च कार्मुकलतां लक्ष्यं तव त्र्यम्बकः

के नामात्र वयं शिरीषकलिकाकल्पं यदीयं मनः।
तत् कारूण्यपरिग्रहात् कुरु दयामस्मिन् विधिये जने
स्वामिन् मन्मथ तादृशं पुनरपि स्वप्नाद्भूतं दर्शय।।[4]

अस्यातिरिक्तं उद्दीपनविभासस्य समावेशेन सरसवातावरणेन च मादकतायाः सृष्टिर्जातं भवति।अस्मिन् नाटिकायां सर्वत्रं प्रसादगुणं तथा वैदर्भीरीतिं च चित्रितमिति। अस्मिन् नाटिकायां प्रस्तावना-विष्कम्भक तथा प्रवेशकस्य लक्षणानुसारीमेव अभिनवकल्पनामण्डितं प्रस्तुतीकरणमस्ति। नाटिकायाः प्रस्तावनां प्रयोगातिशयस्य लक्षणयुक्तम् एवं यस्य सूचनां रत्नावलीनाटिकया सह विशिष्टतायुक्तम्। अस्याः मध्ये वृत्तियोजनायाः आधारस्थितं भारतीवृत्त्याः यथोपयुक्तं प्रयोगेन सह कैशिकीवृत्त्याः रसानुकूलं प्रयोगमपि उपलब्धमस्ति। एतदतिरिक्तम् अभिष्टोऽर्थाभिव्यक्तेः सक्षमं नादसौन्दर्यसमन्वितं पदरचनामपि उपयुक्तं प्रभावं अर्जितुं समर्थोऽस्ति।

शव्दचित्रस्य प्रयोगं राजशेखरस्य रचनायां दृश्यते।यथा-

"चञ्चलचरणचारिवकिमवेल्लितचोलाञ्चलम्
अविरलवेणिवेल्लितभल्ल-वलन-धुतविकसितमल्लिकम्।
राजते घनरणद्रसनावलि-किंकिणीचयं
चन्द्रमुख्याः मदनरणांगणे कन्दुककेलिताण्डवम्।।[5]

अनेन प्रकारेण कविः नाटकस्य सर्वत्रं रससिक्तं पदं योजयित्वा नाटिकात्यन्तं रसपूर्णमकरोत्।अस्मिन्नाटके उपमा-उत्प्रेक्षा-रूपक-प्रतीप-अतिशयोक्ति-भ्रान्तिमान-दीपकादि अर्थालंकाराणां,अनुप्रासयमकादि शब्दालंकाराणां प्रयोगं दृश्यते।

अस्मिन् प्रसंगे नायकमुखनिःसृतं नायिकायाः सौन्दर्यवर्णनं नाटिकायामधिकं मनोहारिं करोति।एतद् प्रसंगे उक्तं श्लोकं प्रतीपोऽलंकारः प्रयोगप्रसंगे उपस्थापितमिति-

"तद्वक्त्रं यदि मुद्रिता शशिकला हा हेम सा चेद् द्युतिः
तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् स्मितं का सुधा।
धिक् कन्दर्प धनुर्भ्रुवौ यदि च ते किं वा बहु ब्रूमहे
तत् सत्यं पुनरूक्तवस्तुविरसः सर्गक्रमौ वेधसः।।"[6]

अस्मिन् नाटिकायां प्रेमेन सह विरहः एकात्मीभूतं भवति।एवं अयं विरहः अधिकं हृदयदग्धकारीं भवति, गगने उद्भासितं शुभ्रशीतलं चन्द्रकिरणेन। यत् वेदनामयमपि मनोहारिरूपेण उपलभ्यते।अस्य मनोहारेः चन्द्रस्य वर्णनं कविः विभावनालंकारप्रयोगेन उपस्थापयति। यथा-

"अकङ्कणमकुण्डलं धरणिमण्डलीभूषणं
अकुङ्कममचन्दनं दशदिशावधूमण्डनम्
अशोषणममोहनं मकरलाञ्छनस्यायुधं
मृगांककिरणावली नभस्तले लक्ष्यते।।[7]

काव्यिकसौन्दर्यविधायकप्रसंगे अपरमेकं संयोजनं छन्दः। छन्दवद्धकाव्यम् सदा सहृदयवानपाठकमण्डलान् निकषा मनोमुग्धकरं भवति। तत् प्रसंगे विद्दशालभञ्जिका नाटिकायामधिकं रमणीयछन्दस्य प्रयोगं विद्यते, येन प्रेमिकहृदयं आन्दोलितं भवति। अस्मिन् नाटिकायां व्यवहृतानि छन्दसमूहान् यथा-शार्दूलविक्रीड़ितं, आर्यां, मालिनीं, वसन्ततिलकं, स्रग्धराञ्च प्रभृति।स्रग्धराछन्दवद्धं मनोमुग्धकरमेकं श्लोकं यथा-

"ये दोलाकेलिकारा मनसि मृगदृशां मान तन्तुच्छिदो ये
सद्यः शृंगारदीक्षाव्यतिकरगुरुवो ये च लोकत्रयेऽपि।
ते कण्ठे लोलयन्तः परभृतवयसां पञ्चमं रागराजं
वान्ति स्मेरं समीराः स्मरविजयमहासाक्षिणो दाक्षिणात्याः।।[8]

यद्यपि नाटिकायां राजान्तःपुरस्य प्रणयलीलां मुख्यः, अतः प्रकृतिवर्णनायां किञ्चित् भिन्नतां अवश्यं विद्यमानमिति। यतः प्रकृतिः अत्र उद्दीपन विभावेन तथा नायकप्रणयस्स क्रीड़ाक्षेत्रेन चित्रितं भवति, यतः राजशेखरः कविरूपेन प्रसिद्धः, अतः प्रकृतिं प्रति तस्यानुरागमासीत्।परन्तु नाट्यतत्त्वस्य रक्षया हेतु नाट्यकृत्यां प्रकृतिं विशेषस्थानं

प्रदानप्रसंगे सः असमर्थोऽ भवत्। राजशेखरः प्रकृतिवर्णनस्य शिल्पीरासीत्।

प्रभातवर्णनप्रसंगे तस्य वर्णनं अति प्रशंसनीयं जातम्।तत्र प्रतिवर्णाः सजीवत्वेन प्रतिपाद्यते, सहसा वोधयति। प्रकृतिवर्णनस्य उल्लेखनीयः उदाहरणः यथा-

"द्वित्रैर्व्योम्नि पुराणमौक्तिकमणिच्छायैः स्थितं तारकैः
ज्योत्स्नापानभरालसेन वपुषा सुप्ताश्चकोराङ्गनाः।
यातोऽस्ताचलमस्तमुद्रसमधुच्छत्रच्छविश्चन्द्रमाः
प्राची बालविड़ाललोचनरूचां जाता च पात्रं ककुभ्।।[9]

प्रकृतिवर्णनप्रसंगे प्रकृत्याः एकमुल्लेखयोग्यं निदर्शनं यथा 'चन्द्रमा'।यत् अति मनोहारिभाषया वर्णितं भूत्वा प्रकृत्याः गुणमयतां वृद्धिं करोति।कवेः सूक्ष्मनिरीक्षणेन चन्द्रमायाः वर्णनां यथा-

"सद्यश्चन्दनपंकपिच्छिलमिव व्योमाङ्गणं कल्पयन्
पश्यैरावतकान्तदन्तमुसलच्छेदोपमेयाकृतिः।
उदगच्छत्ययमच्छमौक्तिकलताप्रालम्बलम्बैः करैः
कान्तानां स्मरलेखवाचनकलाकेलिप्रदीपः शशी।।[10]

प्रसंगानुसारं भाषारचना राजशेखरस्य विशिष्टं गुणमेकमस्ति।तस्य रचनायां वैदर्भी-पाञ्चाली-गौड़ीरीत्याश्च समावेशं विद्यमानमिति।

अस्यां नाटिकायां वैदर्भीरीत्याः विशेषं प्रयोगं यथा-

"दृशा दग्घं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्ता स्तुवे वामलोचनाः।।[11]

नाट्यशिल्पस्य व्यवस्थितं अभिव्यक्तेः प्रधानत्वं अस्ति भाषा। संस्कृतनाटिकायां सर्वत्रं संस्कृतं तथा प्राकृतमादि भाषासमूहस्य प्रयोगविधानम् उपयुक्तं पात्रानुकूलं भाषाप्रयोगं स्मृत्वा शास्त्रीयविधानं प्रदर्श्यते। राजशेखरमपि पूर्ववर्तीनां नाट्यकाराणां परम्परां प्रयोगं च चिन्तयित्वा पात्रानुकूलं भाषाप्रयोगमकरोत्। सदा व्यकरणसम्मतं-परिनिष्ठितं-प्रौढ़ञ्च भाषाप्रयोगेन तस्याभिनवशव्दनिर्माणक्षमतां तथा प्रयोगकौशलं प्रमाणितम्। वारम्वारं वयं तस्य शव्दमूर्च्छनां पठित्वा मुग्धतामनुभवन्ति।

नाटकस्यास्य कथावस्तुः यद्यपि साधारणं किन्तु कविः तत् कथावस्तुं नितान्तं कलात्मकरूपेण परिपूर्णयति। एतदतिरिक्तं तस्य नाट्यशैली तथा वस्तुचित्रणस्य काव्यात्मत्वञ्च प्रशंसनीयम्। तस्य सुसंवद्धं कथावस्तुविश्लेषणं, चरित्रचित्रणं, गुणरसालंकारपरिवेशनं तथा निपुणं शैलीप्रयोगं अत्यन्तमुत्कृष्टम्। कविराजशेखरस्य प्रणयधर्मीनाटिका 'विद्धशालभञ्जिका' सर्वदा पाठकहृदयाणां आह्लादयति इत्यत्र कोऽपि सन्देहो नास्ति।

अन्तटिप्पणी

1. अथर्ववेद,17/8/38
2. वालरामायण,1/12
3. विद्धशालभञ्जिका,प्रथम अंक,7/पृ.9
4. तत्रैव,2/22
5. तत्रैव, द्वितीय अंक,7/पृ.63
6. तत्रैव, प्रथम अंक,14/पृ.15
7. तत्रेव, तृतीय अंक,12
8. तत्रैव, प्रथम अंक,27,पृ.27
9. तत्रैव,11,पृ.13
10. तत्रैव, तृतीय अंक,11
11. तत्रैव, प्रथम अंक,2,पृ.3

ग्रन्थपञ्जी

1. अलङ्कारानुशीलन, सम्पा. डा. राजवंश सहाय हीरा, चौखम्बा विद्याभवन, वाराणसी, 221001 ।
2. बालभारतम्, राजशेखरः, सम्पा.डा.गंगासागर राय, चौखम्बा विद्याभवन, वाराणसी, 1989 प्रथम संस्करण।
3. विद्धशालभञ्जिका, राजशेखरः, सम्पा. श्री बाबूलाल शुक्ल शास्त्री, चौखम्भा ओरियन्टलिया, वाराणसी, 1976, प्रथम संस्करण।
4. विद्धशालभञ्जिका, राजशेखर,सम्पा.पं.रमाकान्त त्रिपाठी, चौखम्बा विद्याभवन, वाराणसी, 1965, प्रथम संस्करण।
5. संस्कृत नाटिका:उद्भव एवं विकास, सम्पा. डां. प्रेमलता मिश्रा, प्रतिभा प्रकाशन, दिल्ली, भारत, 2006, प्रथम संस्करण।
6. संस्कृत साहित्य का इतिहास, सम्पा. आचार्य वलदेव उपाध्याय, शारदा निकेतन, वाराणसी, 2001, पुनर्मुद्रण।
7. संस्कृत साहित्य का इतिहास,सम्पा.डां.उमाशंकर शर्मा ऋषि, चौखम्भा भारती अकादमी, वाराणसी, 2021, पुनर्मुद्रण।